श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीविष्णुपुराणान्तर्गता इन्द्र कृता

# ॥ श्रीस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीस्तुतिः ॥

सिंहासनगतः शक्रः संप्राप्य त्रिदिवं पुनः।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः॥ 1 ॥

इन्द्र उवाच
नमस्ये सर्वभूतानां जननीमब्जसंभवाम्।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षस्स्थलस्थिताम्॥ 2 ॥

पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम्।
वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम्॥ 3 ॥

त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी।
सन्ध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती॥ 4 ॥

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥ 5 ॥

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च।
सौम्यासौम्यैर्जगद्रूपैः त्वयैतद्देवि पूरितम्॥ 6 ॥

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः॥ 7 ॥

त्वया देवि परित्यक्तं सकलं भुवनत्रयम्।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम्॥ 8 ॥

दाराः पुत्रास्तथाऽगार सुहृद्धान्यधनादिकम्।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम्॥ 9॥

शरीरारोग्यमैश्वर्यम् अरिपक्षक्षयस्सुखम्।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम्॥ 10॥

त्वं माता सर्वलोकानां देवदेवो हरिः पिता।
त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम्॥ 11॥

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम्।
मा शरीरं कळत्रञ्च त्यजेथास्सर्वपावनि॥ 12॥

मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणम्।
त्यजेथा मम देवस्य विष्णोर्वक्षस्स्थलालये॥ 13॥

सत्त्वेन शौच सत्याभ्यां तथा शीलादिभिर्गुणैः।
त्यज्यन्ते ते नरास्सद्यः सन्त्यक्ता ये त्वयाऽमले॥ 14॥

त्वयाऽवलोकितास्सद्यः शीलाद्यैरखिलैर्गुणैः।
धनैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि॥ 15॥

स श्लाघ्यस्स गुणी धन्यः स कुलीनस्स बुद्धिमान्।
स शूरस्स च विक्रान्तो यस्त्वया देवि वीक्षितः॥ 16॥

सद्यो वैगुण्यमायान्ति शीलाद्यास्सकला गुणाः।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे॥ 17॥

न ते वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः।
प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन॥ 18॥

श्रीपराशर उवाच
एवं श्रीस्संस्तुता सम्यक् प्राहहृष्टा शतक्रतुम्।
शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ **19** ॥

श्रीरुवाच
परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे।
वरं वृणीष्व यस्त्विष्टो वरदाहं तवागता ॥ **20** ॥

इन्द्र उवाच
वरदा यदि मे देवि वरार्हो यदि चाप्यहम्।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ **21** ॥

स्तोत्रेण यस्तवैतेन त्वां स्तोष्यत्यब्धिसम्भवे।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ **22** ॥

श्रीरुवाच
त्रैलोक्यं त्रिदशश्रेष्ठ न सन्त्यक्ष्यामि वासव।
दत्तो वरो मयायं ते स्तोत्राराधनतुष्टया ॥ **22** ॥

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ **23** ॥

श्रीपराशर उवाच
एवं वरं ददौ देवी देवराजाय वै पुरा।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥ **24** ॥

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः।
देवदानवयत्नेन प्रसूताऽमृतमन्थने ॥ **25** ॥

एवं यदा जगत्स्वामी देवदेवो जनार्दनः।
अवतारं करोत्येषा तदा श्रीस्तत्सहायिनी ॥ **26** ॥

पुनश्च पद्मादुत्पन्ना आदित्योभूद्यदा हरिः।
यदा च भार्गवो रामस्तदाभूद्धरणी त्वियम् ॥ 27 ॥

राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि।
अन्येषु चावतारेषु विष्णोरेषानपायिनी ॥ 28 ॥

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥ 29 ॥

यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम् ॥ 30 ॥

पठ्यते येषु चैवेयं गृहेषु श्रीस्तुतिर्मुने।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ 31 ॥

एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ 32 ॥

इति सकलविभूत्यवाप्तिहेतुः
    स्तुतिरियं इन्द्रमुखोद्गता हि लक्ष्म्याः।
अनुदिनमिह पठ्यते नृभिर्यैः
    वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ 33 ॥

॥ श्रीस्तुतिः समाप्ता ॥